Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 5 | ISSN : 2582-0095

# भारतीयसमाजं प्रति विवेकानन्दः

**तरूणमण्डलः**
सहकारी अध्यापकः, संस्कृतविभागः, गुरुदासकलेजः, पश्चिमवङ्गः।

**Article Info**
Volume 4 Issue 5
Page Number : 88-91

**Publication Issue :**
September-October-2021

**Article History**
Accepted : 01 Sep 2021
Published : 30 Sep 2021

**सारांशः-** महापुरुषाणां कृतिभिराचार्यत्वेन संस्कृतेरभिनवा दिशा जायते। बहवः अत्रासन् महर्षयः आचार्याश्च तीर्थङ्कररूपेणावताररूपेण वा, येषामभावे भारतीयसंस्कृतेः सुषमा स्वरूपं च न प्रादुर्भवेत्। आधुनिके युगे स्वामिविवेकानन्देन दारिद्रतानियुक्तिवर्णवैषम्यजनित सामाजिकसांस्कृतिकजनिताः वहवः समस्याः दृष्टाः। ताश्च दूरीकरणाय तैः महापुरुषैः युवकानां प्रेरयितुं काश्चन पन्थानः उल्लेखिता स्वग्रन्थे । ताश्च मया सारल्येन संक्षेपेण शोधलेखेऽस्मिन् प्रस्तुताः।

**विशेषशब्दाः-** विवेकानन्दः, समाजः, व्यवहारः, भारतीयः, भारतीयसंस्कृतिः।

मनुष्य एक समाजबद्धजीवः भवति। समाजं विना सः जीवितुं न शक्नोति। समाजः नाम् समानधर्मस्थानं समुदायः इति। तस्मात् छात्रसमाजः शिक्षकसमाजः कृषकसमाज इत्यादि व्यवहारः प्रवर्तते। समाजस्य चित्रं साहित्ये प्रतिफलितं भवति। साहित्यं च समाजस्य दर्पणः भवति इति कथ्यते। यथा स्वच्छे, निर्मले, दर्पणे, कश्चित् स्वकीयां प्रतिकृतिं द्रष्टुं शक्नोति, तथैव सशस्ते साहित्ये तदानीन्तनसमाजस्य समुचितं चित्रं द्रष्टुं शक्यते। समजन्ति यस्मिन् मानवाः इति समाजः। मनुष्यसमुदायः यत्र ज्ञानगमनप्रापणादिंक कुर्वन्ति स समाजः। सम् सम्यक् वीयते प्राप्यते धर्मव्यवस्थितस्वरूपमस्मिन्नसौ समाजः।

सम् पूर्वकात् **अज गतिक्षेपणयोः** इत्येतस्मात् धातोः"**अकर्त्तरि च कारके संज्ञायाम्**[1]" इति सूत्रेण घञि सति **अजिव्रज्योश्च** इत्यनेन कुत्वनिषेधे सति समाजशब्दो निष्पद्यते। समुदोरजः पशुषु[2] सूत्रेण समजशब्दो निष्पद्यते यः पशूनां कृते प्रसिद्धः। यथा समजः पशूनाम्, समाजः ब्राह्मणानामिति।

महापुरुषाणामप्रतिमप्रभावो भारतीयसंस्कृतौ वर्तते। पृथिव्यां वैदिकदेवेषु कतिपये इन्द्ररुद्रविष्णुवरुणादयः वर्णिताः। आधुनिकसमाजविज्ञानानुसारं भारतीयसमाजे आर्य–नेग्रिहीप्रोटो–आस्ट्रलायइ–गंगोलभूमध्यसागरीयद्राविडाणां सम्मिश्रणं वर्तते। स्वकीययुगानां महापुरुषाः एवासन्। कालान्तरे तेषां व्यक्तित्वं तादृशमेव दिव्यगुणैः अनुपमं जातम्। यथा रामकृष्णस्वामीविवेकानन्दबुद्धादीनां महापुरुषाणामवतारत्वं सञ्जातं शिवविष्णुगौतमादीनां चरितगाथाभिर्भारतीयसंस्कृतिः काव्यकलाधर्मदर्शनादिषु प्रभाविता। सामाजिकेभ्यो अभिरामजीवनदर्शनप्रदानेन महापुरुषाणामतिमात्रं प्रभावं विद्यते।

---

1. अष्टा. 3.3.19
2. अष्टा. 3.3.69

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

❖ **शक्तेः सन्देशवाहकः**:– भारतीयसंस्कृतिः कर्मप्रधाना भवति। भगवान् श्रीकृष्णः गीतायामुक्तवान्– **"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन**" इति। यः यथा कर्म करोति तस्य तथा गतिर्जायते। सत्कर्मणा पुण्यकर्मणा वा मनुष्यः इहलौकिक – पारलौकिकसुखं चावाप्नोति इति भारतीयानां विश्वासः वर्तते। मनुष्येण सदाऽनासक्तभावनया कर्म करणीयमिति अत्रोच्यते। गीतायामुच्यते पुनः "नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः इति। बृहदारण्यकोपनिषद्यप्युच्यते " पुण्यो वै पण्येन कर्मणा भवति पापः पापेनेति" इति।

अतः यत किमपि कार्यं भवतु नाम मङ्गलकारणं भवति शरीरम्। जानन्ति सर्वे कविकुलगुरुकालिदासेन एका सूक्ति लिखिता। तद्भवति– **'शरीरमायं खलु धर्मसाधनाम्** इति। पुनश्च एकमानवस्य उपरि बहवः ऋणाः वर्तन्ते। तत्सर्वं साधनार्थम् अवश्यं शरीरम् आवश्यकं भवति। अतः स्वामी विवेकानन्देन सुप्तं भारतं जागरयितुम् अग्रे आगतम्। केवलं तावान् नास्ति इतोऽपि तेन स्व मातृभूमिं कथं प्रेमं करणीयं भवति। तदपि दर्शितम् उदाहरणमाध्यमेन। तद्यथा एकम् अंग्रेज मित्रं विवेकानन्दं प्रति एवं पृष्टं यत बहूनि वर्षाणि पाश्चात्यदेशे स्थित्वा यदा स्वमातृभूमिप्रति गमिष्यति, तर्हि कथं भवान् अगवति इति ? तदुत्तरे विवेकानन्देन एवम् उक्तं यत्– भारतवर्ष गग तीर्थभूगिरिति। तथा प्रेग कुर्वन् आसीत् विवेकानन्दः। पुनश्च तेन एवम् उत्तं यत्। गवान् सर्वदा दरिद्रानाम् अन्ते स्थित्वा रोवाम् इच्छति। अतः रोवा कर्तव्या 'शठे शव्यं रामाचरे इत्यपि वाक्यं ते अङ्गीकुर्वन्ति। निर्भरता एवं शक्तेः प्रचारकरूपेण तेषां ख्याति सर्वे जानन्ति एचरमा पुनश्च एतेषां विषये मद्रासविश्वविद्यालयस्य विभागाध्यक्षेन एवमुक्तं यत् राः विवेकानन्दः यः महात्मागाधेः नियुक्तराजनीति मार्ग दत्तवान्। यतः भास्तवर्ष स्वाधीनं जातम्। स्वामिना देशवासिनाम् 'अन्धविश्वासादि' नैव करणीयम् इति बोधितम्। स्वामिना भारतीय यूनः दृष्ट्वा एवमुक्तं यत् – 'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत' इति उक्तिः प्रसिद्धो जातः।

❖ **शिक्षायां योगदानम् -** समाजे शिक्षा भवति प्रधानभूतः स्तम्भः। नारीणां शैक्षणिककृत्यमपि वेदेषु बहुधा निरुप्यते वेदे नारी सरस्वती इति शब्देन सम्बोध्यते। सरस्वती देवी या ज्ञानाधिष्ठात्री वर्त्तते। एकत्र नारी विदुषी इति पदेन सम्बोध्यते तथा प्रार्थ्यते यत् भवती यज्ञं प्रापयतु अस्माभिरिति यथा– **उषासोनक्ता विदुषीव विश्वमा हा वहतो मर्त्याय यज्ञम्।** स्वामिदयानन्देन यजुर्वेदभाष्ये स्पष्टमुल्लिखितम्– "स्त्रीणां मध्ये या विदुषी स्त्री स्यात् सा सर्वाः स्त्रियः सदा सुशिक्षेत्, यतः स्त्रीणां मध्ये विद्यावृद्धिः स्यादिति"।

शिक्षा मानवान् अन्येभ्यः प्राचीनेभ्यः शिक्षा भिन्नतां जनयति। शिक्षाविषये दार्शनिकदृष्ट्या चिन्तां कुर्मश्चेत् अस्माभिः ज्ञातुं शक्यते आदिमशिक्षालय भवति अस्माकं गृहम्। तत्र आचारव्यवहारशिक्षा पितृभ्यां परिवारकुटुम्बैः प्राप्यते। ततः यौवनकाले शिक्षा विद्यालयात् महाविद्यालयाच्च आचार्यैः वैदिकशिक्षा प्राप्यते। युवकः भवन्ति समाजस्य उन्नतौ वाहकाः। यौवनसमये समीचीनशिक्षां प्राप्नुवन्ति चेत् एव समाजकल्याणं स्यात् नान्यथा।

शिक्षाविषये विवेकानन्देन एवमुक्तं यत् – शिक्षा नाग मानवस्य अन्तर्निहितपूर्णतायाः अभिव्यक्तिरेव शिक्षा इति। स्वागिना उदासीन एवं निराशव्यक्तीनां कृते साहसम् अददत्। पुनः एवं सन्देशः दत्तं यत् – भीतिः कदापि न करणीयम्। किमर्थम् इत्युक्ते भीतिरेव मरणस्य कारणम्। भीतिः पापोऽपि भवति। भीतिः अधोलोकः, अधार्मिकता। अतः कदापि स्वजीवने भीतिः मास्तु इति।

❖ **युनां प्रत्युपदेश:** - प्राय: सर्वे श्रुतमेव स्यु: एक वाक्यं – 'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत' इति। अनेनयता एवं सन्दिशति यत् हे ! मम भारतीया: उतिष्ठंतु, आलस्यं मा भवत् किमर्थ इत्युत्ते उच्यते– 'आलस्यं हि मनुष्याणां शरीररथो महान् रिपु:' इति। अत: उतिष्ठ जाग्रत, ये ये महात्मन :समीचीनं कार्य कृत्वा राष्ट्रे प्रसिद्ध: तान् एव अनुसर।

पुन: एवम उपादिषत भारतीययुवावर्गान् यद् तेषां आत्मनिर्भरता एवं व्यक्तित्वविषये, त्याग एवं सेवाविषये सकारात्मक विचारविषये एवम् अन्ते शुभसंकल्पविषये उक्तम्। शनि पुन: एवम् अबोचत् यत् यूनां देशैव भारतवर्ष: यत्र 70% जना: 30 वर्षात न्यन:। देशम् अग्रे नेतुं यूनां भूमिका महत्वपूर्णा भवति। अत: सर्वदा स्वकर्मेव निमग्ना: भवेयु:। सर्वदा भावना संस्थापयामा अहिंसा परमो धर्म:' इति विज्ञाय स्वजीवने आनेयु:। पुन: भारत विश्वगरुपदवी प्रदातुं भारतीययुववर्गा: सर्वदा पवित्रसंकल्प:, योग:, शारीरिकव्यायाम:, समयरय सदुपयोग:, पौष्टिकभोजनं, सच्चिन्तनादि अवश्यं स्वमनसि आनेयु:।

❖ **संस्कृतभाषां प्रति विवेकानन्द:-** इयं पृथिवी एका सुविशाला पुष्करिणी। मानवसभ्यतारूपं कमलपुष्पं संस्कृतिरूपेण सौरभेण सह तत्र विकसितं सत् सम्पूर्णं जगदाह्लादयति। कस्यापि राष्ट्रस्य ख्याति: तदीयसंस्कृतिमाध्यमेनैव सम्भवति। संस्कृति: मानवजीवनस्य प्राणदायिनी शक्तिरित्युच्यते। धराजगत्यामस्यां विद्यमानानां राष्ट्राणां संस्कृति: विविधरूपेण विकसिता सती एकमेव लक्ष्यस्थलं प्राप्नोति। एषा संस्कृति: मानवानां सुख–शान्ति–समृद्धि–ख्याति–गतिप्रगतिषु सर्वदा विम्बरूपेण प्रतिविम्बिता अवलोक्यते। संस्कृतेरस्या: संस्कारेण, संस्कृतेन च सह नित्यं चिरस्थायी सम्बन्धो विद्यते। इयं भारतीयचिन्तनधारायां प्राच्यसंस्कृति:, पाश्चात्यसंस्कृतिरिति द्विधा विभज्यते। प्राच्यदेशेषु प्रचलिता संस्कृति: प्राच्यसंस्कृतिरित्युच्यते। पाश्चात्यदेशेषु अमेरिकादिषु प्रचलिता संस्कृति: पाश्चात्यसंस्कृतिरिति कथ्यते। पाश्चात्यदेशेषु यूरोप–अमेरिका–अष्ट्रेलिआदिदेशा: अन्तर्भवन्ति। एतेषु देशेषु प्रचलिता वंशपरम्परा, नैतिकमूल्यानि, पारम्परिकवस्त्राभूषणानि, विश्वसनीयसामाजिकव्यवस्था, शिल्पकला, प्रौद्योगिकविज्ञानञ्च तत्तद्देशानां सांस्कृतिकोपादानानि भवन्ति, यै: तेषामाचार: व्यवहारश्च प्रभावितौ भवत:। तथैव प्राच्यदेशेषु भारतस्य संस्कृते: मूल्यं सर्वोच्चस्थानमलङ्करोति। वैदिककालादारभ्य परिवर्तिता परिबृंहिता चास्माकं संस्कृति: सर्वेषां देशानां कृते प्रेरणास्रोतोभूता भवति। तत्संस्कृतिश्च अस्माभि: संस्कृतवाङ्मयाद् अधिगन्तुं शक्यते। प्राचीनभारतीयार्यभाषा संस्कृत–पदेन व्यवह्रियते, इदं संस्कृतं लौकिकवैदिकभेदाभ्यां द्वैविध्यमापन्नमस्ति। वैदिकभाषा छान्दसपदेनापि निगद्यते। सप्तसिंधुप्रदेशस्येयं भाषा उदीच्यभाषारूपेण व्यातिमापत् । इयमेव परिनिष्ठिता तथा साहित्येनोपेता संस्कृतभाषाऽऽसीत्। अस्या: भाषाया: विषये सर्वै: प्राय: अवगता:, अत: न आलोच्यन्ते।

स्वामिना संस्कृतस्य महत्त्वं विषये एवमुक्तं यत् – 'भारत' अस्माकं देशस्य नाम। तत्र संस्कृतज्ञानं विना कदापि 'भा' इति शब्दस्य अर्थ व्युत्पत्तिश्च नैव सम्भवति। तदर्थ वेद:, उपनिषद्, ब्रहासूत्रादिविवेकानन्द: अपठत्। स्वामिन: धेयं वाक्यं भवति – 'उतिष्ठत जाग्रत प्राप्य बरान्निबोधत इति। यस्या: समस्याया: समाधानम् अन्यत्र कुत्रापि नास्ति, तत्तु अवश्यं संस्कृतैव वर्तते। तत्र एकम् अथर्ववेदस्य मन्त्रं वर्तते –

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**

**देवाभागं यथा पूर्व संजानाना उपासते। ।**

अत: तेषां मते संस्कृते पाण्डित्यं भवति चेत् सर्वेऽपि सम्मानं कुर्वन्ति। विरोधे किमपि वक्तुं न पारयति। एषैव महान् रहस्य संस्कृतभाषाया:।

❖ **नारीणां विषये उपदेश:-** समाजे नारीनां स्थानं देवीतुल्या आसीत्। यतो हि नारीनां गौरवचर्चा रामायणादौ सर्वत्र कृता अस्ति। वैदिकवाङ्मयानुशीलनेन ज्ञायते यत् पुराकालादेव नारीणां स्थानमभ्यर्हितमतीव गौरवास्पदमासीत्। ऋषिका, गृहिणी, गृहस्वामिनी, माता, भगिनी, पुत्री इत्यादिभि: विशेषणपदै: समलंक्रियते स्म। सा सर्वक्षेत्रेषु कुशला भवति स्म।

न अरी इति नारी अर्थात सवेऽपि जानन्ति यत नारी इत्यस्य काय। जरा शत नारा अर्थात यरया शारा न सन्ति। परन्तु अद्यतनसमाजं यदि अवलोकयाम:, ताह तासां सर्वेऽपि। पठनविषये उत स्वतन्त्रविषये तासाम अधिकारमेव नास्ति यथा पुरुषाणाम्। याद पुराणम् अवलोकयामत तय एवमस्ति यत् –

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता।**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्रा फलाक्रिया:। ।**

परन्तु सर्वेऽपि तान सर्वान विस्मृत्य ते सर्वे एवं चिन्तयन्ति 'विश्वासनैव करणीय स्वी च'। अत: विवेकानन्दमतेन तथा न आसीत् तै: सर्वदा नारीणाम् उन्नति चिन्तितम। अत: वयं सर्वेऽपि विवेकानन्द: सदृश स्त्री सम्मानप्रदेयम्।

**सिद्धान्ता:** - अत: अद्यतनसमाजे यदि विवेकानन्दसदृस: भावना मनसि आगच्छति सर्वेषां तर्हि अस्माकं भारतवर्षे पुन: रामराज्यभवितुमर्हति।

**सन्दर्भग्रन्थसूची**


1. स्वास्थ्य शिक्षा ओर् पर्यावरण अध्यायनम्, विवेक कुमार सिंह–, के एस के पाब्लिकेशन्,
2. मनुस्मृति:, मोतीलाल बनारसीदास–दिल्ली, 1983
3. वर्तमान भारत,. स्वामी विवेकानन्द:, श्रीरामकृष्ण आश्रम, नागपूर्,मध्यप्रदेश:
4. नीतिशतकम्, भर्तृहरि:, चौखाम्बा संस्करणम् काशी,
5. स्वामी विवेकानन्द: एक अनन्त जीवन जीवनी, सञ्जीव चट्टोपाध्याय, जनरल् बुक् सामान्य किताव, कोलकाता
6. अथर्ववेद:, विश्वेश्वरानन्द, वैदिकशोधसंस्थानम्, होसियारपूर